॥ आथर्वणोपनिषत्प्रारंभः ॥

श्रीमद्धनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः ॥ हरिःॐ ॥ ब्रह्मादेवानांप्रथमःसं
बभूवविश्वस्यकर्ताभुवनस्यगोप्ता।सब्रह्मविद्यांसर्वविद्याप्रतिष्ठामथर्वायज्येष्ठपुत्रायप्राह॥१॥अथर्वणेयांप्रवदेत
ब्रह्माअथर्वातांपुरोवाचांगिरेब्रह्मविद्यां।सभारद्वाजायसत्यवहायप्राहभारद्वाजोंगिरसेपरावरां ॥२॥ शौनको
हवैमहाशालोंगिरसंविधिवदुपसन्नःपप्रच्छ। कस्मिन्नुभगवोविज्ञातेसर्वमिदंविज्ञातंभवतीति॥३॥तस्मैसहोवा
च।द्वेविद्येवेदितव्येइतिहस्मयद्ब्रह्मविदोवदंति।पराचैवापराच॥४॥तत्रापरा।ऋग्वेदोयजुर्वेदःसामवेदोथर्ववेदः
शिक्षाकल्पोव्याकरणंनिरुक्तंछंदोज्योतिषमिति ॥५॥ अथपरा।ययातदक्षरमधिगम्यते। यत्तदद्रेश्यमग्राह्यम
गोत्रमवर्णमचक्षुःश्रोत्रंतदपाणिपादंनित्यंविभुंसर्वगतंसुसूक्ष्मं। तदव्ययंयद्भूतयोनिंपरिपश्यंतिधीराः॥६॥ य
थोर्णनाभिःसृजतेगृह्णतेच यथापृथिव्यामोषधयःसंभवंति । यथासतःपुरुषात्केशलोमानितथाक्षरात्संभवती
हविश्वं ॥७॥ तपसाचीयतेब्रह्मततोन्नमभिजायते। अन्नात्प्राणोमनःसत्यंलोकाःकर्मसुचामृतं॥८॥यस्सर्वज्ञः
सर्वविद्यस्यज्ञानमयंतपः।तस्मादेतद्ब्रह्मनामरूपमन्नंचजायते॥९॥खं०॥१॥तदेतत्सत्यं। मंत्रेषुकर्माणिकवयो
यान्यपश्यंस्तानित्रेतायांबहुधासंततानि। तान्याचरथनियतंसत्यकामाएषवःपंथाःसुकृतस्यलोके ॥१॥ यदा

लेलायतेह्यर्चिःसमिद्धेहव्यवाहने । तदाज्यभागावंतरेणाहुतीःप्रतिपादयेत् ॥ २ ॥ यस्याग्निहोत्रमदर्शपूर्ण
मासमनाग्रयणमतिथिवर्जितंच । अहुतमवैश्वदेवमविधिनाहुतमासप्तमांस्तस्यलोकान्हिनस्ति ॥३॥ काली
करालीचमनोजवाचसुलोहितायाचसुधूम्रवर्णा । स्फुलिंगिनीविश्वरुचीचदेवीलेलायमानाइतिसप्तजिह्वाः
॥ ४ ॥ एतेषुयश्चरतेभ्राजमानेषुयथाकालंचाहुतयोह्याददायन् । तंयंत्येताःसूर्यस्यरश्मयोयत्रदेवानांपतिरे
कोधिवासः ॥ ५ ॥ एह्येहीतिमाहुतयःसुवर्चसःसूर्यस्यरश्मिभिर्यजमानंवहंति । प्रियांवाचमभिवदंत्योर्चयंत्य
एषवःपुण्यःसुकृतोब्रह्मलोकः ॥ ६ ॥ प्लवाह्येतेअदृढायज्ञरूपाअष्टादशोक्तमवरंयेषुकर्म । एतच्छ्रेयोयेभिनंदं
तिमूढाजरामृत्युंतेपुनरेवापियंति ॥ ७ ॥ अविद्यायामंतरेवेष्ट्यमानाःस्वयंधीराःपंडितंमन्यमानाः । जंघन्य
मानाःपरियंतिमूढाअंधेनैवनीयमानायथांधाः ॥८॥ अविद्यायांबहुधावर्तमानाःस्वयंकृतार्थाइत्यभिमन्यंति
बालाः । यत्कर्मिणोनप्रवेदयंतिरागात्तेनातुराःक्षीणलोकाश्च्यवंते ॥९॥ इष्टापूर्तंमन्यमानावरिष्ठंनान्यच्छ्रेयो
वेदयंतेप्रमूढाः । नाकस्यपृष्ठेसुकृतेतेनुभूत्वाइमंलोकंहीनतरंवाविशंति ॥१०॥ तपःश्रद्धेयेह्युपवसंत्यरण्येशांता
ताविद्वांसोभैक्षचर्यांचरंतः । सूर्यद्वारेणतेविरजाःप्रयांतियत्रामृतःसपुरुषोह्यव्ययात्मा ॥ ११ ॥ परीक्ष्यलोका

 न्कर्मचितान्ब्राह्मणोनिर्वेदमायान्नास्त्यकृतःकृतेन । तद्विज्ञानार्थंसगुरुमेवाभिगच्छेत्समित्पाणिःश्रोत्रियंब्रह्म
 निष्ठं ॥१२॥ तस्मैसविद्वानुपसन्नायसम्यक्प्रशांतचित्तायशमान्विताय । येनाक्षरंपुरुषंवेदसत्यंप्रोवाचतांतत्त्व
तोब्रह्मविद्यां ॥१३॥ खं० ॥२॥ तदेतत्सत्यं । यथासुदीप्तात्पावकाद्विस्फुलिंगाःसहस्रशःप्रभवंतेसरूपाः । तथा
क्षराद्विविधाःसोम्यभावाःप्रजायंतेतत्रचैवापियंति ॥१॥ दिव्योह्यमूर्तःपुरुषःसबाह्याभ्यंतरोह्यजः । अप्राणो
ह्यमनाःशुभ्रोह्यक्षरात्परतःपरः ॥२॥ एतस्माज्जायतेप्राणोमनस्सर्वेंद्रियाणिच । खंवायुर्ज्योतिरापःपृथिवीवि
श्वस्यधारिणी॥३॥ अग्निर्मूर्धाचक्षुषीचंद्रसूर्यौदिशःश्रोत्रेवाग्विवृताश्चवेदाः । वायुःप्राणोहृदयंविश्वमस्यपद्भ्यां
पृथिवीह्येषसर्वभूतांतरात्मा ॥४॥ तस्मादग्निःसमिद्धोय(धोऽय)श्चसूर्यःसोमात्पर्जन्यओषधयःपृथिव्यां । पुमा
न्रेतःसिंचतियोषितायांबह्वीःप्रजाःपुरुषात्संप्रसूताः ॥५॥ तस्मादृचःसामयजूंषिदीक्षायज्ञाश्चसर्वेक्रतवोदक्षि
णाश्च । संवत्सरश्चयजमानश्चलोकाःसोमोयत्रपवतेयत्रसूर्यः ॥६॥ तस्माच्चदेवाबहुधासंप्रसूताःसाध्यामनुष्याः
पशवोवयांसि । प्राणापानौव्रीहियवौतपश्चश्रद्धासत्यंब्रह्मचर्यंविधिश्च ॥७॥ सप्तप्राणाःप्रभवंतितस्मात्सप्तार्चि
षःसमिधःसप्तहोमाः । सप्तइमेलोकायेषुचरंतिप्राणागुहाशयांनिहिताःसप्तसप्त ॥८॥ अतःसमुद्रागिरयश्चसर्वे

अस्मात्स्यंदंतेसिंधवःसर्वरूपाः। अतश्चसर्वाओषधयोरसाश्चयेनैषभूतैस्तिष्ठतेह्यंतरात्मा ॥ ९ ॥ खं० ॥ ३ ॥
पुरुषएवेदंविश्वंकर्मतपोब्रह्मपरामृतं। एतद्योवेदनिहितंगुहायांसोविद्याग्रंथिंविकिरतिहसोम्य ॥ १ ॥ आविः
संनिहितंगुहाचरंनाममहत्पदं। अत्रैतत्सर्वमर्पितमेजत्प्राणन्निमिषच्चयत् ॥२॥ एतज्जानथसदसद्वरेण्यंपरंवि
ज्ञानाद्यद्वरिष्ठंप्रजानां। यदर्चिमद्यदणुभ्योणुचयस्मिँल्लोकानिहितालोकिनश्च ॥३॥ तदेतदक्षरंब्रह्मसप्राणस्त
दुवाङ्मनः। तदेतत्सत्यंतदमृतंतद्वेद्धव्यंसोम्यविद्धि ॥ ४ ॥ धनुर्गृहीत्वौपनिषदंमहास्त्रंशरंह्युपासानिशितंसं
दधीत। आयम्यतद्भावगतेनचेतसालक्ष्यंतदेवाक्षरंसोम्यविद्धि ॥ ५ ॥ प्रणवोधनुःशरोह्यात्माब्रह्मतल्लक्ष्यमु
च्यते। अप्रमत्तेनवेद्धव्यंशरवत्तन्मयोभवेत् ॥६॥ यस्मिन्द्यौःपृथिवीचांतरिक्षमोतंमनःसहप्राणैश्चसर्वैः। तमेवै
कंजानथआत्मानमन्यावाचोविमुंचथामृतस्यैषसेतुः ॥७ ॥ अराइवरथनाभौसंहतायत्रनाड्यः। सएषोंतश्च
रतेबहुधाजायमानः ॥८॥ ओमित्येवध्यायतआत्मानंस्वस्तिवःपारायतमसःपरस्तात् ॥९ ॥ यःसर्वज्ञःसर्ववि
द्यस्यैषमहिमाभुवि। दिव्येब्रह्मपुरेह्येषव्योम्न्यात्मासंप्रतिष्ठितः ॥१०॥ मनोमयःप्राणशरीरनेताप्रतिष्ठितोन्नेहृद
यंसंनिधाय। तद्विज्ञानेनपरिपश्यंतिधीराआनंदरूपममृतंयद्विभाति ॥ ११ ॥ भिद्यतेहृदयग्रंथिश्छिद्यंतेसर्वसं

शयाः । क्षीयंतेचास्यकर्माणितस्मिन्दृष्टेपरावरे ॥ १२॥ हिरण्मयेपरेकोशेविरजंब्रह्मनिष्कलं । तच्छुभ्रंज्योति
षांज्योतिस्तद्यदात्मविदोविदुः ॥ १३ ॥ नतत्रसूर्योभातिनचंद्रतारकंनेमाविद्युतोभांतिकुतोयमग्निः । तमेवभां
तमनुभातिसर्वंतस्यभासासर्वमिदंविभाति ॥१४॥ ब्रह्मैवेदममृतंपुरस्ताद्ब्रह्मपश्चाद्ब्रह्मदक्षिणतश्चोत्तरेण । अ
धश्चोर्ध्वंचप्रसृतंब्रह्मैवेदंविश्वमिदंवरिष्ठं ॥१५॥ खं० ॥ ४॥ द्वासुपर्णासयुजासखायासमानंवृक्षंपरिषस्वजाते ।
तयोरन्यःपिप्पलंस्वाद्वत्त्यनश्नन्नन्योअभिचाकशीति ॥१॥ समानेवृक्षेपुरुषोनिमग्नोअनीशयाशोचतिमुह्यमा
नः ।जुष्टंयदापश्यत्यन्यमीशमस्यमहिमानमितिवीतशोकः ॥ २॥ यदापश्यःपश्यतेरुक्मवर्णंकर्तारमीशंपुरुषं
ब्रह्मयोनिं । तदाविद्वान्पुण्यपापेविधूयनिरंजनःपरमंसाम्यमुपैति ॥ ३ ॥ प्राणोह्येषसर्वभूतैर्विभातिविजान
न्विद्वान्भवतेनातिवादी । आत्मक्रीडआत्मरतिःक्रियावानेषब्रह्मविदांवरिष्ठः ॥ ४ ॥ सत्येनलभ्यस्तपसाह्येष
आत्मासम्यग्ज्ञानेनब्रह्मचर्येणनित्यं । अंतःशरीरेज्योतिर्मयोहिशुभ्रोयंपश्यंतियतयःक्षीणदोषाः ॥ ५॥ सत्य
मेवजयतिनानृतंसत्येनपंथाविततोदेवयानः । येनाक्रमंत्यृषयोह्याप्तकामायत्रतत्सत्यस्यपरमंनिधानं ॥ ६ ॥
बृहच्चतद्दिव्यमचिंत्यरूपंसूक्ष्माच्चतत्सूक्ष्मतरंविभाति । दूरात्सुदूरेतदिहांतिकेचपश्यत्स्विहैवनिहितंगुहायां

॥७॥ नचक्षुषागृह्यतेनापिवाचानान्यैर्देवैस्तपसाकर्मणावा । ज्ञानप्रसादेनविशुद्धसत्त्वस्ततस्तुतंपश्यतेनिष्क
लंध्यायमानः ॥ ८ ॥ एषोणुरात्माचेतसावेदितव्योयस्मिन्प्राणःपंचधासंविवेश । प्राणैश्चित्तंसर्वमोतंप्रजानां
यस्मिन्विशुद्धेविभवत्येषआत्मा ॥९॥ यंयंलोकंमनसासंविभातिविशुद्धसत्त्वःकामयतेयांश्चकामान् । तंतंलो
कंजयतेतांश्चकामांस्तस्मादात्मज्ञंह्यर्चयेद्भूतिकामः ॥१०॥ खं० ॥५॥ सवेदैतत्परमंब्रह्मधामयत्रविश्वंनिहितं
भातिशुभ्रं । उपासतेपुरुषंयेह्यकामास्तेशुक्रमेतदतिवर्ततिधीराः ॥ १ ॥ कामान्यःकामयतेमन्यमानःसकाम
भिर्जायतेतत्रतत्र । पर्याप्तकामस्यकृतात्मनश्चइहैवसर्वेप्रविलीयंतिकामाः ॥२॥ नायमात्माप्रवचनेनलभ्योन
मेधयानबहुनाश्रुतेन । यमेवैषवृणुतेतेनलभ्यस्तस्यैषआत्माविवृणुतेतनूंस्वां ॥ ३ ॥ नायमात्माबलहीनेनल
भ्योनचप्रमादात्तपसोवाप्यलिंगात् । एतैरुपायैर्यततेयस्तुविद्वांस्तस्यैषआत्माविशतेब्रह्मधाम ॥४॥ संप्राप्यैन
मृषयोज्ञानतृप्ताःकृतात्मानोवीतरागाःप्रशांताः । तेसर्वगंसर्वतःप्राप्यधीरामुक्तात्मानःसर्वमेवापियंति ॥ ५ ॥
वेदांतविज्ञानसुनिश्चितार्थाःसंन्यासयोगाद्यतयःशुद्धसत्त्वाः । तेब्रह्मलोकेषुपरांतकालेपरामृतात्परिमुच्यं
तिसर्वे ॥ ६ ॥ गताःकलाःपंचदशप्रतिष्ठादेवाश्चसर्वेप्रतिदेवतासु । कर्माणिविज्ञानमयश्चआत्मापरेव्ययेसर्वए

कीभवंति ॥ ७ ॥ यथानद्यःस्यंदमानाःसमुद्रायणाःसमुद्रंप्राप्यास्तंगच्छंतिनामरूपेविहाय । तथाविद्वान्नाम
रूपाद्विमुक्तःपरात्परंपुरुषमुपैतिदिव्यं ॥८॥ सयोहवैतत्परमंब्रह्मवेदब्रह्मैवभवति । नास्याब्रह्मवित्कुलेभवति ।
तरतिशोकंतरतिपाप्मानंगुहाग्रंथिभ्योविमुक्तोऽमृतोभवति ॥ ९ ॥ तदेषश्लोकः। क्रियावंतःश्रोत्रियाब्रह्मनि
ष्ठाःस्वयंजुह्वतएकर्षीऽश्रद्धयंतः । तेषामेवैतांब्रह्मविद्यांवदेतशिरोव्रतंविधिवद्यैस्तुचीर्णं ॥ १० ॥ तदेतत्सत्यमृ
षिरंगिराःपुरोवाच । नैतदचीर्णव्रतोधीते ॥ ॐनमःपरमऋषिभ्योनमःपरमऋषिभ्यः ॥ ११ ॥ खं० ॥६ ॥ इति
श्रीमदाथर्वणोपनिषत्समाप्ता ॥ श्रीकृष्णार्पणमस्तु ॥ श्रीहयवदनायनमः ॥ ॥ ॥

श्रीमद्धनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः ॥ हरिॐ ॥ आनंदमजरंनित्यम
जमक्षयमच्युतं। अनंतशक्तिंसर्वज्ञंनमस्येपुरुषोत्तमं । मनोर्वैवस्वतस्यादावथर्वाब्रह्मणोजनि। मित्रश्चवरुणश्चा
थोप्रहेतिर्हेतिरेवच।ब्रह्मणःप्रथमेकल्पेशिवःप्रथमजःस्मृतः।सनकाद्यास्तुवाराहेब्रह्माविष्णोःसुतोग्रजइतिब्रह्मां
डे।१-५।ऋगाद्याअपराविद्यायदाविष्णोर्नवाचकाः।ताएवपरमाविद्यायदाविष्णोस्तुवाचकाइतिपरमसंहिता
यां।ऋग्भिर्होत्रेणशंसंतितथौद्गात्रैस्तुवंतिये।विष्णुमेवतथातस्मैयजुर्भिरपिजुह्वति।स्तुवंत्याथर्वणैश्चैनंसेतिहास
पुराणकैः। नविष्णोःसदृशंकिंचित्परमंचापिमन्वते । सर्वोत्तमंतंजानंतस्तेहिभागवतोत्तमाः।वेदेरामायणेचै
वपुराणेभारतेतथा । आदावंतेचमध्येचविष्णुःसर्वत्रगीयते। एतदंतेचमध्येचब्रह्मैवोक्त्वाविजानतां । ऋगा
दिपंचधासंस्थंशब्दब्रह्मप्रशाम्यति । यंवाकेष्वनुवाकेषुनिषत्सूपनिषत्सुच । स्तुवंतिसत्यकर्माणंसत्यंसत्येषुसा
मसु । सर्वेवेदायत्पदमामनंतितपांसिसर्वाणिचयद्वदंति । यदिच्छंतोब्रह्मचर्यंचरंतितत्तेपदंसंग्रहेणप्रवक्ष्ये ।
वेदैश्चसर्वैरहमेववेद्योवेदांतकृद्वेदविदेवचाहमितिचभारते। चतुर्दशमहाविद्यास्थानानिवेदितव्यानिभवंतीति
चमूलश्रुतिः। पंचरात्रमृगाद्याश्चसर्वमेकंपुराभवत् । मूलवेदइतिह्याख्याकालेकृतयुगेतदा । नैवऋसामादि

नामानितदावेदस्यचाभवन्। नैवचेंद्रादिनामानिविष्णोरन्यत्रकुत्रचित्। ब्रह्मरुद्रेंद्रपूर्वैस्तुनामभिःप्रोच्यतेहरिः।
देवतात्वेनचेज्यस्सब्रह्माद्यामनुनामकाः। वक्तृत्वेनपितृत्वेनकारित्वेनैवचादरात्। इज्यंतेदेवताःसर्वानतुदेव
तयाक्वचित्। अनन्ययाजिनस्तेतुतस्मात्कार्तयुगाजनाः। प्राप्नुवंतिहरिंतंचतस्माद्भेदेनकिंचन। पारावर्यंह
रेर्यस्मादुत्थितास्तुरगाननात्। ऋगाद्याअनुव्याख्यांतास्तस्मात्सर्वैर्हरिंयजेत्। तस्माद्ब्रह्मादयःसर्वेमनवोमा
नवास्तथा। यजंतिसर्ववेदैस्तंजानंतिचविनिश्चयात्। अशक्तःपंचरात्रेणऋगाद्यैर्वाथतंयजेत्। ऋगाद्यैरेवस
त्रैतैर्भिन्नैरिष्टोजनैर्हरिः। द्वापरीयैर्जनैर्विष्णुःपंचरात्रैस्तुकेवलैः। कलौतुनाममात्रेणपूज्यतेभगवान्हरिः।
एकोवेदःकृतेह्यासीत्त्रेतायांसत्रिधाभवत्। सएवपंचधाजातोद्वापरंप्राप्यवैयुगं। उत्सन्नःसकलिंप्राप्यवेदःप्राये
णसर्वशः। मुख्योधर्मःकार्तयुगोवर्तितव्यःकलावपि। त्रेतादौतदशक्त्याहिधर्मोन्यःसंप्रकीर्तितः। कृतेभा
गवताःसर्वेवेदाश्चपुरुषास्तथा। त्रेतायांभिन्नविषयास्ततस्त्रैविद्यतांगताः। तस्मादेकःसर्ववेदैर्ज्ञेयोविष्णुःसना
तनः। पूज्योयज्ञैःसोपचारैर्ध्येयोवंद्यश्चसर्वदेत्यादिनारायणसंहितायां। वेदवादाश्चानुयुगंह्रसंतीतिचनः
श्रुतिरितिभारते। वेदैश्चपंचरात्रैश्चभक्त्यायज्ञैस्तथैवच। दृश्योहंनान्यथादृश्योवर्षकोटिशतैरपीत्यादिवाराहे।

अत्रापितदेतत्सत्यंमंत्रेषुकर्माणिकवयोयान्यपश्यन्नित्यादिनाकर्मविषयामपरविद्यामुक्त्वा येनाक्षरंपुरुषंवेद सत्यंप्रोवाचतातत्त्वतोब्रह्मविद्यामित्यारभ्याथर्वणानेवमंत्रान्परविद्यात्वेनाह। चतुर्वेदसंस्कारवतामेवचविद्यायामधिकारउक्तः। तेषामेवैतांब्रह्मविद्यांवदेतशिरोव्रतंविधिवद्यैस्तुचीर्णमिति। शिरोव्रतमित्युपलक्षणत्वेन। स्ववेदव्रतयुक्तस्यसर्ववेदगतास्वपि। अधिकारोस्तिविद्यासुनावेदव्रतिनःक्वचिदितिव्यासस्मृतौ।एतद्ब्रह्मचतुर्मुखःखं०॥१॥ तदेतत्सत्यंभगवान्। तत्कामाःकर्माण्याचरथ। तदासापिपरविद्या। अन्यथाप्लवाह्येतेअदृढायज्ञरूपाः। भगवद्विषयत्वेनकृतेएषवःपुण्यःसुकृतोब्रह्मलोकः। परब्रह्मलोकः। निष्कामंज्ञानपूर्वंयन्निवृत्तमिहचोच्यते। निवृत्तंसेवमानस्तुब्रह्माभ्येतिसनातनमितिव्यासस्मृतौ। सयआत्मानमेवलोकमुपास्तेनहास्यकर्मक्षीयतइतिचश्रुतिः। सहयज्ञाःप्रजाःसृष्ट्वेत्युक्त्वाएवंप्रवर्तितंचक्रंनानुवर्तयतीहयः।अघायुरिंद्रियारामोमोघंपार्थसजीवतीतिच। यांतिमद्याजिनोपिमामितिच। अहंहिसर्वयज्ञानांभोक्ताचप्रभुरेवच। नतुमामभिजानंतितत्त्वेनातश्च्यवंतितइतिच। यस्त्वात्मरतिरित्युक्त्वापि कुर्याद्विद्वांस्तथासक्तइत्येवोक्तत्वाच्च। येत्वेतदभ्यसूयंतोनानुतिष्ठंतिमेमतं। सर्वज्ञानविमूढांस्तान्विद्धिनष्टानचेतसइतिच। लोकेस्मिन्द्विविधानिष्ठापुराप्रोक्तामया

नघेत्युक्तत्वाच्चनात्राश्रमांतरविरोधः। त्रेतायांबहुधासंततानिकृतेत्वेकप्रकारेणैवसंततानि। अग्निष्टोमादिभि र्यज्ञैःसर्वदेवस्थितंहरिं । यजंतितांश्चकारित्वाद्वसुस्तस्मात्तथायजत् । पृथक्पृथक्त्रेतायांयजंतेदेवतागणा न्। यथाकृतेतथाप्राज्ञास्त्रेतायांबहुधाततइतिपाद्मे । यमिंद्रमाहुर्वरुणंयमाहुर्यंमित्रमाहुर्यमुसत्यमाहुः। योदे वानांदेवतमोजनित्रोवायोस्तस्मैसोममेभ्योजुहोमि । एवंवायोःपितरंविष्णुमेवयजंतिदेवैःसहयेकृतेजनाः। एवंत्रेतायांकेचिदन्येपृथक्तानिष्ठाविष्णावर्पयंतेनचान्यइतिचब्रह्मांडे । विष्णोःसर्वेभ्यःकिंचिदुत्तमत्वंजानंत इमंलोकमाविशंति । साम्यंहीनत्वंवाजानंतोहीनतरंतमएवविशंति। देवेभ्यउत्तमंविष्णुंराजवद्यस्तुमन्यते । याजीसमानुषंयातिसाम्यहीनत्ववित्तमइतिच । त्रैविद्यामामितितुयेप्यन्यदेवताभक्ताः । तेपिमामेवकौंतेय यजंति । अहंहिसर्वयज्ञानांभोक्तेत्युक्तत्वादज्ञानपूर्वयाजिनस्त्रैविद्याः॥ खं०॥२॥ अपरंत्वक्षरंयासाप्रकृति जंडरूपिका । अक्षरंपरमंश्रीस्तुपरतःपरमक्षरं । वासुदेवःपरानंदइतित्रिविधमक्षरमितिच । विष्ण्वंगा नांहिनामानिध्रुवादीनितुसर्वशः । क्रीडादिशक्तिरूपत्वात्तज्जत्वादन्यवस्तुष्वितिच । वासुदेवःपुमान्नामा पूर्णत्वात्सस्वयोषिति । रमायांगर्भमदधात्प्रजास्तस्मात्प्रजज्ञिरइतिच । सप्तार्चिषोवृत्तयः । होमाःसंबंधाः।

लोकागोलकाः । गुहाशयांबुद्धौ । लोपःसमानइतिसूत्रादेकयकारलोपः । प्रतिपुरुषंसप्तसप्त । भगवतः कर्मचेष्टातपोज्ञानंच ॥ खं० ॥३॥ परामृतब्रह्माख्यःपुरुषोभगवानेव । यैषाचेष्टाभगवतोयच्चज्ञानंपरात्मनः। तत्सर्वंभगवानेवयेचधर्माबलादयइतिच । स्वाभाविकीज्ञानबलक्रियाचेतिश्रुतिः । विज्ञानाद्ब्रह्मणःपरं । नाभिह्रदादिहसतोंभसियस्यपुंसोविज्ञानशक्तिरहमाससमनंतशक्तेरितिभागवते । प्राणःप्रणयनाद्विष्णुर्वक्तृत्वाद्वागुदीरितः । मनोमंतृत्वतोविष्णुःसर्वजीवनियामकइतिशब्दनिर्णये । अमृतस्यमुक्तस्यसेतुः ॥ मुक्तोपसृप्यव्यपदेशात् ॥ मुक्तानांपरमागतिरित्यादेः । हृदयस्थःसदाविष्णुर्बहुधाचैकधाभवन् । चरति स्वेच्छयैवांतःसर्वजीवान्नियामयन्निति प्रवृत्ते।पराअप्यवरायस्मात्सहिविष्णुःपरावरः। ब्रह्मांडमध्यगोनित्यंतत्पत्येपरवौस्थितइतिच । सूर्यादयस्तंनभासयंति । इदंब्रह्मैवविश्वंपूर्णं । इदमेववरिष्ठंसर्वोत्तमं । इदंशब्दानांबहुत्वाद्ब्रह्मविषयएवेदंशब्दः॥खं०॥४॥ स्वादुवत्सर्वदात्ति । नतुस्वाद्वेव । तस्येदाहुःपिप्पलंस्वाद्वग्रेतन्नोन्नशद्यःपितरंनवेदेत्यज्ञानांस्वादुनिषेधात् । जीवाद्यमेवनाश्नातिभगवान्नतुनाश्नात्येव । तस्येदाहुःपिप्पलंस्वाद्वित्युक्तत्वात्। स्वातंत्र्येणैवभोक्तृत्वाद्दुःखाभोगाच्चसर्वदा।अभोक्ताचैवभोक्ताचभगवान्विष्णुरव्ययइतिचतत्त्वसा

रे। नास्तीशोस्यायतोन्योहिततोनीशाहरेर्मतिः। तयामुह्यतिजीवस्तमन्यंज्ञात्वाविमुच्यते। जीवादन्यःस्वतं
त्रोयंयतोतःपुरुषोत्तमइतिब्रह्मसारे। पुण्यंचानिष्टंविधूय। सत्योहिभगवान्विष्णुःसद्गुणत्वात्प्रकीर्तितः। अ
सुरास्तद्विरुद्धत्वादनृताःपरिकीर्तिताः। तस्यविष्णोर्निधानंतुवैकुंठोलोकउत्तमइतिच। सर्वगत्वात्तद्दूरेंतिके
च। नान्यैर्देवैर्हरिंपश्येज्ज्ञानरूपेणवायुना। ब्रह्मणापरमज्ञानरूपेणहरिणातथा। प्रसन्नेनैवतंपश्येदन्येनुज्ञा
प्रदायिनइतिच। षोडशकलाशरीरोनभवतीतिनिष्कलः। यदापश्यःपश्यतेरुक्मवर्णं। आनंदरूपममृतंयद्वि
भातीत्युक्तत्वात्॥ खं० ॥५॥ सआत्मज्ञार्चकोब्रह्मणोधामप्राणंवेद। यत्रविश्वंपूर्णंब्रह्मनिहितं। प्रधानंधामवि
ष्णोस्तुप्राणएवप्रकीर्तितः। उपायैर्योविजानीयात्प्राणस्थंपरमेश्वरं। तस्यप्राणेहरिर्नित्यमाविष्टोभवतिध्रुवं।
नित्यंप्राणेस्थितस्यैवविष्णोरावेशएवहि। प्राणद्वारेणयज्ज्ञानदीपनंज्ञानिनःसदा। सन्निधानंयथाप्राप्ताःपिशा
चाःपुरुषेष्वपि। तत्रस्थित्वापिभुंजंतआविशेयुःपुनश्चते। मंत्रादिभिस्तथाविष्णुःसदाप्राणस्थितोपिसन्। ज्ञा
नदीप्त्यादिकंकुर्याज्ज्ञानिनःपुनरेवत्वितिच। एतच्छुक्रंप्रत्यन्यदतिवर्तते। सर्वंतीर्त्वाहरिंशुक्रंप्रतिवर्तीभवे
त्पुनः। ज्ञानिनःसाहिमुक्तिःस्यात्तन्नैवात्येतिकश्चनेतिमहावाराहे। सर्वतोदेहादेर्मुक्ताःसर्वगंभगवंतंप्राप्यत

मेवापियंति। देहादेःसर्वतोमुक्ताःसर्वगंपुरुषोत्तमं। प्राप्यतस्मिन्प्रविश्याथमोदंतेंतर्बहिस्तथेतिच। ब्रह्मलोकेषुस्थित्वापरांतकालेपरिमुच्यंति। अविरोधश्चसादृश्यमेकदेशस्थितिस्तथा। एकीभावस्त्रिधाप्रोक्तोनैकीभावःस्वरूपयोः। कुतोऽभूतस्यभवनंस्वरूपस्यैक्यमेवहि। अतोनदीनांजीवानांविरुद्धानांनृणामपि। अब्धिनाहरिणाचैवतथैवचनरांतरैः। एकीभावस्तुसंश्लेषोविरोधस्यचवर्जनं। स्वरूपैक्यंकुतस्तेषांनित्यभिन्नस्वरूपिणां। हरेरपिस्वरूपाणामेकीभावोयदोच्यते। संश्लेषएवसिद्धत्वात्स्वरूपैक्यस्यनोभवइतिच। गताःमुक्ताः। प्राणादिपंचदशकलारूपादेवताः। अन्येचदेवाःसर्वेप्रतिदेवतासुदेवताप्रतिबिंबभूतासुप्रजासुप्रतिप्रतिस्थिताःकर्माणिविज्ञानमयोजीवश्चपरमात्मनिप्रविशंति। प्रतिबिंबोहरेःप्राणस्तस्यचान्याःकलाःक्रमात्। कलानांदेवताअन्यादेवतानांनराअपि। तस्मात्सर्वेषुमुक्तेषुनरेष्वपिनियामकाः। तिष्ठंतिनात्रसंदेहःपरमात्मनिचाखिलाइतिमुक्तविवेके। कलाभ्यश्चान्यदेवेभ्यःकर्मप्रत्यवरंयतः। कलाभ्यःपृथगुक्तंतत्पुष्करःकर्मचोच्यतइति। अन्यथागताभविष्यंतीत्यध्याहारोदोषः। नचमूलरूपाणिप्रतिदेवताइत्युच्यंतेदेवानां। प्रतिरूपशब्दवद्धिप्रतिदेवताशब्दः। विज्ञानात्मासहदेवैश्चसर्वैःप्राणाभूतानिसंप्रतिष्ठंतियत्र। इमाःषोडशकलाःपुरुषायणाःपुरु

षंप्राप्यास्तंगच्छंतियथासोम्येमाःसमुद्रायणाइतिनदीदृष्टांतपूर्वकंपुरुषप्राप्तिकथनाच्चमुक्तादेवताएवोच्यंते । सप्राणमसृजतेत्यादेश्चपुरुषोभगवान् । अगम्यनामरूपत्वादमुक्तैर्मुक्तिगानराः । विहीननामरूपास्तुनहित द्रहितत्वतः । अशरीरोयथावायुःसामान्यागम्यदेहतः । एवंनद्यःसमुद्रस्थाःसामान्यागम्यरूपतइतिच । स्व कीयमुदकंनद्यःसमुद्रेनैवजानते । वायुस्तुतत्पृथग्ज्ञात्वामेघेकृत्वाप्रवर्षतीतिच । विमुक्तइत्यमुक्तइत्यर्थः । विप्रियइतिवत् । अविहायेतिच । अनंतंवैनामेतिश्रुतेः । परंब्रह्मविदित्वातुबृंहितःस्यात्स्वयोग्यतः । ना योग्यंकिंचिदाप्नोतिकुतएवहरेर्गुणानितिच । ब्रह्मत्वंबृंहितत्वंस्याज्जीवानांनपरात्मता । अस्वतंत्रस्यजीव स्यकुतोनित्यस्वतंत्रतेतिस्कांदे । यत्रामृतःसपुरुषोह्यव्ययात्मा । यत्रतत्सत्यस्यपरमंनिधानं । अमृतस्यैष सेतुः । शरवत्तन्मयोभवेत् । ब्रह्मतल्लक्ष्यमुच्यते । निरंजनःपरमंसाम्यमुपैति । इत्यादिनामुक्तस्यसर्वत्र भगवत्सकाशाद्भेदस्यैवोक्तत्वाच्च ॥ मुक्तोपसृप्यव्यपदेशात् ॥ जगद्व्यापारवर्जं ॥ प्रकरणादसन्निहितत्वाच्चे त्यादिनाभगवतापिसर्वत्रभेदस्यैवसूचितत्वात् । नतेमहित्वमन्वश्नुवंति । सोश्नुतेसर्वान्कामान्सहब्रह्मणावि पश्चिता । ब्रह्मेशानादिभिर्देवैर्यत्प्राप्तुंनैवशक्यते । तद्यत्स्वभावःकैवल्यंसभवान्केवलोहरइत्यादेश्च । मुक्ते

भ्योपिमनुष्येभ्योदेवाएवगुणाधिकाः । तेभ्योवायुस्ततोविष्णुःपरिपूर्णगुणःसदा । येत्वेतदन्यथाविद्युस्तेहि
यांत्यधरंतमः । येत्वेतदेवंजानंतितेयांतिपरमंहरिमितिच । देवानांसंततौजाताःप्रायशोज्ञानिनःकृते । ब
लवद्धेतुतश्चान्येयस्माद्ब्रह्मविदःसुराः । नसंततौब्रह्मविदोनराणांज्ञानिनामपि । प्रायशःस्युःसुराणांचनिय
मोयंकृतेयुगे । तस्मात्सभगवान्विष्णुर्ज्ञेयःसर्वोत्तमोत्तमः । सदासर्वगुणैःपूर्णोयोनंतःपुरुषोत्तमइतिच । श्री
यतांभगवान्मह्यंप्रेष्टप्रेष्टतमःसदा । ममनित्यंनमाम्येनंपरमोदारसद्गुणं ॥ ६ ॥ इतिश्रीमदानंदतीर्थभगव
त्पादाचार्यविरचितमाथर्वणोपनिषद्भाष्यंसंपूर्णं ॥ ॥ श्रीपांडुरंगविठ्ठलार्पणमस्तु ॥ श्रीहयग्रीवायनमः॥

॥ आथर्वणभाष्यंसंपूर्ण ॥

The Credit of getting the Sarvamoola Books Scanned goes to Panditavareenya ityaadi birudankita Shreemajjaalihaala Shreenivaasaachaaryasya Vidyaa Suta, "Gomanjari" Udgrantha kartru, (Raghunatha suri virachita Manikya manjari granthasya Khandana Grantha) Veda Shaastra Puraanaartha Vishaarada, Panditavareenya Shree Dwarakaanaathaachaaryaru. My heartful salute for him to provide me such a wonderful opportunity to work on this project.

Project Started on : 21 December 2009
Project Completed on : 20 March 2011

Scanned By : Aravindacharya Haranahalli, aravindbharadwajhs@gmail.com